## (705) "तप दाहे" (X-चुरादिः-1819. सक. सेट्. उभ.)

आधृषीयः ।

'सन्तापेऽर्थे तपेद् दाहे तापयेत् तपते तपेत् ।' (श्लो. 131) इति देवः । अस्य धातोः आधृषीयत्वात् णिचो वैकल्पिकत्वं बोध्यम् । ण्यन्तात्, शुद्धात्, सन्नन्तात्, यङन्ताच्च पूर्वोक्तभौवादिकतपधातुवत् (704) सर्वाण्यपि रूपाणि ज्ञेयानि । अस्योभयपदित्वात् शानचि—तपमानः-तप्स्यमानः, तितप्समानः, तितप्सिष्यमाणः, इत्यादीनि रूपाण्यधिकानि भवन्ति, इति विशेषः । [A]चित्ततापी इति शुद्धाद्धातोर्णिनिप्रत्यये । ण्यन्तात् सनि इमानि रूपाणि—यथा—तितापयिषकः-षिका, तितापयिषिता-त्री, तितापयिषन्-न्ती, तितापयिषिष्यन्-न्ती-ती, तितापयिषमाणः, तितापयिषिष्यमाणः, तितापयिट्-ड्-यिषौ-यिषः ; तितापयिषितः-तवान्, तितापयिषुः, तितापयिषितव्यम्, तितापयिषणीयम्, तितापयिष्यम्, ईषत्तितापयिषः-दुस्तितापयिषः-सुतितापयिषः, तितापयिष्यमाणः, तितापयिषः, तितापयिषितुम्, तितापयिषा, तितापयिषणम्, तितापयिषित्वा, संतितापयिष्य, तितापयिषम् २, तितापयिषित्वा २.

## (706) "तमु काङ्क्षायाम्" (IV-दिवादिः-1202. सक. सेट्. पर.)

शमादिः । घटादिः । [अ]

[1]तमकः-मिका, [2]तमकः-मिका, तितमिषकः-षिका, [3]तन्तमकः-तंतमकः-मिका; तमिता-त्री, तमयिता-त्री, तितमिषिता-त्री, तन्तमिता-त्री ; [4]ताम्यन्-न्ती, तमयन्-न्ती, तितमिषन्-न्ती ; ——

1. 'नोदात्तोपदेशस्य मान्तस्यानाचमेः' (7-3-34) इति वृद्धिनिषेधः । एवं घञि, णमुलि च ज्ञेयम् ।
2. 'जनीजॄष्क्नसुरञ्जोऽमन्ताश्च' (ग. सू. भ्वादौ) इति मित्संज्ञायाम्, 'मितां ह्रस्वः' (6-4-92) इति णौ उपधाया ह्रस्वः । एवं ण्यन्ते सर्वत्र ज्ञेयम् ।
3. यङन्ते, 'नुगतोऽनुनासिकान्तस्य' (7-4-84) इत्यभ्यासस्य नुगागमः । तस्य 'पदान्तवद्वाच्यः' (वा. 7-4-84) इति वचनात् पदान्तवद्भावे, 'वा पदान्तस्य' (8-4-59) इति परसवर्णविकल्पः । एवं यङन्ते सर्वत्र रूपद्वयं ज्ञेयम् ।
4. 'शमामष्टानां दीर्घः श्यनि' (7-3-74) इति दीर्घः ।

A. 'अजरद्व्रुषवद् विरिक्तपीडः पुनरभ्येत्य विशिष्टचित्ततापि ।' धा. का. 3. 49.

[अ] 'ग्लानावेव [अस्य] प्रयोगः । मुरारिस्तु 'द्रष्टुं बहूस्ताम्यति ।' इति काङ्क्षायामेवाह ।' इति धातुकाव्यव्याख्याने [2-65] ।